# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ७ | गुणाः - ७० |
| विषयः - ज्यौतिषशास्त्रम् | (C.E.- 2.3.3. New ) | |
| दिनाङ्कः - ११/१२/२०१८ | भारतीयकुण्डलीविज्ञानम् । | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितश्लोकेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

(१) संवत्कालस्त्वङ्कयुतः कृत्वा शून्यरसैर्हृतः ।
शेषः संवत्सरो ज्ञेयः प्रभवादिर्बुधैः क्रमात् ॥

(२) गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता ।
लब्धमंशादिना शोध्यं योज्यं स्पष्टो भवेद् ग्रहः ॥

(३) मेषादिगे सायनभागसूर्ये दिनार्धभा या पलभा भवेत् सा ।
त्रिष्ठा हतास्युर्दशभिर्भुजंगैर्दिग्भिश्चरार्धानि गुणोद्धृताऽन्त्या ॥

**प्रश्नः २ अधोलिखितप्रश्नयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत । ( १० )**

(१) लंकोदयमानानि तथा तेभ्यः स्वोदयसाधनम् (२) चन्दसाधनम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितश्लोकेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

(१) एवं लंकोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात् ।
पूर्वपश्चान्नतादन्यत् प्रागवतद्दशमं भवेत् ॥

(२) कुजयमजीवज्ञसिताः पञ्चेन्द्रियवसुमुनीन्द्रियांशानाम् ।
अयुजि युजि तु भे विपर्ययस्थाः ॥

(३) नीचोनखेटो रसतोऽधिकश्चेत् चक्राद्विशोध्यायोऽस्य च भे सरूपे ।
लवादिका ये द्विगुणा भवेयुरूच्चाभिधाना ग्रहरश्मयस्ते ॥

**प्रश्नः ४ अधोलिखितप्रश्नयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत । ( १० )**

(१) दशासाधनम् (२) अभिजित् दशासाधनम् ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितश्लोकेषु कयोश्चित् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

(१) द्विघ्नेष्टनाड्यः पंचाप्ता भं शेषञ्च पलीकृतम् ।
दशाप्तमंशास्ते युक्ता रवौ होरोदयो भवेत् ॥

(२) चन्द्रराश्याधिपो यत्र तत्त्रिकोणमथापि वा ।

तत्सप्तमे त्रिकोणे वा संशये लग्ननिर्णयः ॥

(३) घटी चतुर्गुणा कार्या तिथ्याप्तैश्च पलैर्युता ।

शेषं पलाद्यं द्विगुणं स्पष्टभास्करसंयुतम् ॥

**प्रश्नः ६ अधोलिखितप्रश्नेषु कमप्येकं प्रश्नं सविस्तरं निरूपयत । (१०)**

(१) कारकांशलग्नविचारः ।

(२) गुलिकेष्टसाधनम् ।

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितप्रश्नानां संक्षेपेण उत्तराणि प्रददतु ।( कोऽपिदश ) (१०)**

(१) विनाडी शब्दस्य कः अर्थः ?

(२) अर्कोदय इत्यस्य कः अर्थः ?

(३) अमावास्यायाः पूर्वार्धे किं करणम् ?

(४) करणप्रकारं कति विधम् ?

(५) लवाः अर्थात् किम् ?

(६) प्रथमसंवत्सरस्य नाम किम् ?

(७) शिखि शब्दात् कति संख्या गृह्यते ?

(८) गतनक्षत्रः भरणी अस्ति तदा आगामी नक्षत्रः कः भवति ?

(९) संवत्सराः कति संख्यकाः भवन्ति ?

(१०) 'राक्षसालयम्' इति शब्दस्य कोऽर्थः ?

(११) भृगो इत्यस्य अर्थः कः ?

(१२) एक सावनमासे कति दिवसाः भवन्ति ?

(१३) एकस्मिन् राशौ कति नक्षत्रचरणानि सन्ति ?

(१४) मुन्सर्नाड अर्थात् कः ग्रहः ?

(१५) झष अर्थात् का राशिः ?

--००--